ઓં સત્ગુરુભ્યો નમઃ

અસ્ય શ્રી બુધસ્તોત્ર મહા મન્ત્રસ્ય
વસિષ્ઠ ઋષિ અનુષ્ટુપ્ છન્દઃ બુધો દેવતા
બુધ પ્રીત્યર્ત્થે જપે વિનિયોગઃ

**ધ્યાનં**

ભુજૈશ્ચતુર્ભિર્વરદા ટ ભયાસિ
ગદા વસન્તં સુમુખં પ્રશાન્તં
પીતપ્રભં ચન્દ્રસુતં સુરેડ્યં
સિંહે નિષણ્ણં બુધમાશ્રયામિ (1)

પીતાંબરઃ પીતવપુઃ
પીત ધ્વજરથસ્તિતઃ
પીયૂષ રશ્મિતનયઃ
પાતુમાં સર્વ્વદા બુધઃ (2)

સિંહવાહં સિદ્ધનુતં
સૌમ્યં સૌમ્યગુણાન્વિતં
સોમસૂનું સુરારાદ્ધ્યં
સર્વ્વદા સૌમ્યમાશ્રયે (3)

બુધં બુદ્ધિપ્રદાતારં
બાણબાણાસનોજ્વલં
ભદ્રપ્રદં ભીતહરં
ભક્તપાલનમાશ્રયે (4)

આત્રેયગોત્રસંજાતં
આશ્રિતાર્ત્તિનિવારણં
આદિતેય કુલારાદ્ધ્યં
આશુ સિદ્ધિતમાશ્રયે (5)

કલાનિધિ તનૂજાતં
કરુણારસવારિધિં
કલ્યાણદાયિનં નિત્યં
કન્યારાશ્યાધિપં ભજે (6)

મન્દસ્મિત મુખાંભોજં
મન્મથાયુતસુન્દરં
મિથુનાધીશમનઘં
મૃગાઙ્કતનયં ભજે (7)

ચતુર્ભુજં ચારુરૂપં
ચરાચર જગત્પ્રભું
ચર્મ્મ ખટ્ગધરં વન્દે
ચન્દ્રગ્રહતનૂત્ભવં (8)

પઞ્ચાસ્ય વાહનગતં
પઞ્ચપાતકનાશનં
પીતગન્ધં પીતમાલ્યં
બુધં બુધતનું ભજે (9)

બુદ્ધસ્તોત્રમિદં ગુહ્યં
વસિષ્ઠેનોદિતં પુરા
યઃ પઠેચ્છ્રુણુયાત્વાપિ
સર્વ્વાભીષ્ટમવાપ્નુયાત્ (10)

**શ્રીબુધસ્તોત્રં સન્પૂર્ણણં**